ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१३८. सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः। शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥

ध्वन्यालोके अस्मिन् श्लोके कीदृशः ध्वनिः कथितः?

(A) विवक्षितान्यपरवाच्यध्वनिः

(B) सध्वनिः

(C) भावध्वनिः

(D) अविवक्षितवाच्यध्वनिः

ध्वन्यालोकः प्रथम उद्योतः १.१३

अस्ति ध्वनिः। स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन। तत्राद्यस्योदाहरणम् -

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः। शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥

द्वितीयस्यापि –

शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।
तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः॥

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१३९. स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन्।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते॥ उक्तिरियं कस्य ग्रन्थस्य वर्तते ?

(A) काव्यप्रकाशस्य

(B) साहित्यदर्पणस्य

(C) ध्वन्यालोकस्य

(D) दशरूपकस्य

ध्वन्यालोकः प्रथम उद्योतः १.११

इदानीं वाच्यार्थप्रतीतिपूर्वकत्वेऽपि तत्प्रतीतेर्व्यङ्ग्यस्यार्थस्य प्राधान्यं यथा न विलुप्यते तथा दर्शयति -

स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन्।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते॥१.११॥

यथा स्वसामर्थ्यवशेनैव वाक्यार्थं प्रकाशयन्नपि पदार्थो व्यापारनिष्पत्तौ न भाव्यते विभक्ततया।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४०. शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते। वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्॥

अत्र स इति पदेन कस्य बोधो भवति ?

(A) वाच्यार्थस्य

(B) प्रतीयमानार्थस्य

(C) तात्पर्यार्थस्य

(D) लक्ष्यार्थस्य

ध्वन्यालोकः प्रथम उद्योतः १.७

इदं चापरं प्रतीयमानस्यार्थस्य सद्भावसाधनं प्रमाणम् -

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।

वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवल्॥१.७॥

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४१. को नाम पाकाभिमुखः जन्तुर्द्वाराणि दैवस्य विधातुमीष्टे॥ कस्येयमुक्तिः ?

(A) सीतायाः

(B) रामस्य

(C) भागीरथ्याः

(D) पृथिव्याः

उत्तररामचरितम् ७.४

पृथिवी – (आश्वास्य) देवि! सीतां प्रसूय कथमाशवसिमि ?

सोढश्चिरं राक्षसमध्यवासस्त्यागो द्वितीयस्तु सुदुःसहोऽस्याः।

गङ्गा -

को नाम पाकाभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे?॥

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४२. कस्मिन् रूपकभेदे नायकः अमात्यविप्रवणिजां मध्ये एको भवति ?

(A) डिमे

(B) प्रकरणे

(C) व्यायोगे

(D) ईहामृगाङ्के

प्रकरणम्

भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम् ॥
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ।
सापायधर्मकामार्थपरो धीरप्रशान्तकः ॥

- साहित्यपदर्पणः ६.२२४-२२५

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४३. कस्मिन् रूपकभेदे आकाशभाषितैरेव सम्बोधनोक्तिप्रत्युक्तयः भवन्ति ?

(A) समवकारे

(B) प्रकरणे

(C) भाणे

(D) वीथ्याम्

भाणः

भाणः स्याद्धूर्तचरितो नानावस्थान्तरात्मकः।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः। रङ्गे प्रकाशयेत्स्वेनानुभूतमितरेण वा॥
संबोनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः। सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः॥
तत्रैतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती। मुखनिर्वहणो सन्धी लास्याङ्गानि दशापि च॥

- साहित्यपदर्पणः ६.२२७-२३०

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४४. 'कामं दुग्धे विप्रकर्षत्यलक्ष्मीं कीर्तीं सूते दुर्हृदो निष्प्रलाति'

उक्तिरियं कस्यास्ति ?

(A) सुमन्त्रस्य

(B) रामस्य

(C) चन्द्रकेतोः

(D) लवस्य

उत्तररामचरितम् पञ्चमोऽङ्कः

लवः –

कामं दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्तिं सूते दुर्हृदो निष्प्रलान्ति।
शुद्धां शान्तां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः॥५.३०॥

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४५. अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति॥ कस्येयमुक्तिः ?

(A) लवस्य

(B) रामस्य

(C) चन्द्रकेतोः

(D) सुमन्त्रस्य

उत्तररामचरितम् पञ्चमोऽङ्कः

सुमन्त्रः – भूयसां जीविनामेव धर्म एष यत्र स्वरसमयी कस्यचितक्वचित्प्रतीतिः, यत्र लौकिकानामुपचारस्तारामैत्रकं चक्षूराग इति। तदप्रतिसंख्येयनिबन्धनं प्रमाणमामनन्ति।

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति॥५.१७॥

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४६. तिलकमंजरी कस्य रचना अस्ति ?

(A) दण्डिनः

(B) वादीमसिंहस्य

(C) धनपालस्य

(D) विश्ववेश्वरस्य

तिलकमञ्जरी

(समरकेतु-तिलकमञ्जर्योः प्रणयकथा)

तज्जन्मा जनकाङ्घ्रिपङ्कजरजःसेवाप्तविद्यालवो
विप्रः श्रीधनपाल इत्यविशदामेतामबध्नात्कथाम्।
अक्षुण्णोऽपि विविक्तसूक्तिरचने यः सर्वविद्याब्धिना
श्रीमुञ्जेन सरस्वतीति सदसि क्षोणीभृता व्याहृतः॥५३॥

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४७. चित्रमीमांसा कस्य रचना अस्ति ?

(A) वाग्भट्टस्य

(B) नरसिंहस्वामिनः

(C) पण्डितराजजगन्नाथस्य

(D) अपय्यदीक्षितस्य

अप्पय्यदीक्षितविरचिता चित्रमीमांसा

अलङ्कारग्रन्थेषु एषः प्रौढः। ग्रन्थादौ ध्वनिः वर्णितः। तदनन्तरं क्रमशः गुणीभूतव्यङ्ग्यः, काव्यचित्राणि, अर्थालङ्काराः प्रतिपादिताः।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

Suggested: सूक्तियाँ / सूक्तयः

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४८. त्यजन्त्यसून्शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम्॥

उक्तिरियं कस्य ग्रन्थस्य वर्तते ?

(A) रघुवंशस्य

(B) मेघदूतस्य

(C) उत्तररामचरितस्य

(D) नैषधमहाकाव्यस्य

नैषधीयचरितम् १.५०

स्मरोपतप्तोऽपि भृशं न स प्रभु-
र्विदर्भराजं तनयामयाचत।
त्यजन्त्यसून् शर्म्म च मानिनो वरं
त्यजन्ति नत्वेकमयाचितव्रतम्॥

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

DSSSB PGT SANSKRIT MALE EXAM 2021SOLVED PAPER PART - III EXAM DATE 16/7/21POSTCO...

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१४९. मृच्छकटिकानुसारं शास्त्रवन्तोऽपि कैः निर्जिताः भवन्ति ?

(A) रूपशस्त्रैः

(B) शास्त्रशस्त्रैः

(C) विद्याशस्त्रैः

(D) गुणशस्त्रैः

मृच्छकटिकम् १.४५

विटः –

एष ते प्रणयो विप्र! शिरसा धार्यते मया।
गुणशस्त्रैर्वयं येन शास्त्रवन्तोऽपि निर्जिताः॥

12:27 / 13:17 Scroll for details SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१५०. कनकधारास्तवः कस्य रचनाऽस्ति ?

(A) यमुनाचार्यस्य

(B) शंकराचार्यस्य

(C) जगद्धरभट्टस्य

(D) वेंकटाध्वरिणः

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१०१. यस्य शब्दस्य श्रवणादेव सम्बन्धः प्रतीयते सा श्रुतिर्भवति ।

(A) अभिधात्री

(B) विधात्री

(C) अविनियोक्त्री

(D) विनियोक्त्री

अर्थसंग्रहः - विनियोगविधेः श्रुत्यादिषट्प्रमाणानि

एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि। श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि।.....।

श्रुतिनिर्वचनम्

तत्र निरपेक्षवः श्रुतिः। सा च त्रिधा – विधात्री, अभिधात्री, विनियोक्त्री च। तत्राद्या लिङाद्यात्मिका। द्वितीया व्रीह्यादिश्रुतिः। यस्य च शब्दस्य श्रवणादेव सम्बन्धः प्रतीयते सा विनियोक्त्री।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

DSSSB PGT SANSKRIT MALE EXAM 2021SOLVED PAPER PART - III EXAM DATE 16/7/21POSTCO...

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१०२. अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः ।
सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितम् ॥ अस्मिन् पद्यो को दोषः ?

(A) क्लिष्टपदम्

(B) अवाचकम्

(C) ग्राम्यम्

(D) निहतार्थम्

काव्यप्रकाशः सप्तम उल्लासः दोषदर्शनः

क्लिष्टं यतोऽर्थप्रतिपत्तिर्व्यवहिता। यथा -

अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः।
सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितम्॥२६२॥

काव्यप्रकाशवृत्तिः ७.५१

जब काव्य में ऐसी शब्द योजना हो जिससे अर्थ की प्रतीति प्रत्यक्ष रूप से न होकर व्यवधान के साथ हो, वहाँ क्लिष्टत्व दोष होता

0:50 / 13:17 Scroll for details SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१०३. सामर्थ्यं सर्वशब्दानां किम् अभिधीयते ?

(A) स्थानम्

(B) वाक्यम्

(C) प्रकरणम्

(D) लिङ्गम्

अर्थसंग्रहः - विनियोगविधेः श्रुत्यादिषट्प्रमाणानि

एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि। श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि।.....।

लिङ्गनिर्वचनम्

शब्दसामर्थ्यं लिङ्गम्। यच्चाहुः 'सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते' इति। सामर्थ्यं रूढिरेव। तेन समाख्यातोऽस्या भेदः। .....

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१०४. तर्कसंग्रहानुसारं स्नेहस्य गणना केषु भवति ?

(A) द्रव्येषु

(B) सामान्येषु

(C) गुणेषु

(D) कर्मसु

तर्कसंग्रहः - स्नेहगुणनिरूपणम्

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१०५. अङ्गभावनासम्बन्धिप्रकरणं किमुच्यते ?

(A) अवान्तरप्रकरणम्

(B) वाक्यम्

(C) स्थानम्

(D) महाप्रकरणम्

अर्थसंग्रहः - विनियोगविधेः श्रुत्यादिषट्प्रमाणानि एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि। श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि।.....। प्रकरणनिरूपणम् - उभयाकाङ्क्षा प्रकरणम्। ..... प्रकरणद्वैविध्यं महाप्रकरणञ्च - तच्च प्रकरणं द्विविधम्। महाप्रकरणमवान्तरप्रकरणञ्चेति। तत्र मुख्यभावनासम्बन्धिप्रकरणं महाप्रकरणम्। अवान्तरप्रकरणम् - .....अङ्गभावसम्बन्धिप्रकरणमवान्तरप्रकरणम्।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१०६. शाब्दीभावनायाः साध्यमस्ति ?

(A) स्वर्गादिफलम्

(B) अर्थवदज्ञाप्यप्रशंसा

(C) लङादिज्ञानम्

(D) आर्थीभावना

अर्थसंग्रहः - भावनाविचारः

.....। भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः। सा द्विधा। शब्दीभावाना। आर्थीभावना चेति। तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुरव्यापारविशेषः शाब्दीभावना।.....सा च भावनांशत्रयमपेक्षते। साध्यं साधनमितिकर्तव्यताञ्च।..... तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थीभावना साध्यत्वेनान्वेति।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१०७. वीरभयानकरसयोः एकाश्रये विरोधोऽस्ति न वा ?

(A) न निश्चयः

(B) सन्देहास्पदः

(C) नास्ति

(D) अस्ति

साहित्यदर्पणः तृतीयः परिच्छेदः

एतेषां च रसानां परस्परविरोधमाह –

आद्यः करुणबीभत्सरौद्रवीरभयानकैः॥३.२५४॥

भयानकेन करुणेनापि हास्यो विरोधभाक्।

करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः॥३.२५५॥

रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि।

भयानकेन शान्तेन तथा वीररसः स्मृतः॥३.२५६॥

शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः।

शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः॥३.२५७॥

शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१०८. यत्र समग्राङ्गोपदेशः सा किं भवति ?

(A) प्रकृतिः

(B) विनियोगः

(C) विकृतिः

(D) उत्पत्तिः

अर्थसंग्रहः - विनियोगविधेः श्रुत्यादिषट्प्रमाणेषु वाक्यनिरूपणे प्रकृतिविकृतिलक्षणम्
यत्र समग्राङ्गोपदेशः सा प्रकृतिः। यथा दर्शपूर्णमासादिः। तत्प्रकरणे सर्वाङ्गपाठात्। यत्र न सर्वाङ्गोपदेशः सा विकृतिः। यथा सौर्य्यादिः। तत्र कतिपयाङ्गानामतिदेशेन प्राप्तत्वात्। अनारभ्यविधिः सामान्यविधिः।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१०९. सादिरनन्तः अभावः कः ?

(A) अन्योन्याभावः

(B) प्रध्वंसाभावः

(C) अत्यन्ताभावः

(D) प्रागभावः

अन्नम्भट्टविरचितः तर्कसंग्रहः

अभावश्चतुर्विधः – प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्चेति ।

अभाव-प्रकरणम् – अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य। सादिरनन्तः प्रध्वंसाभावः। उत्पत्त्यनन्तरं कार्यस्य। त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽभावोऽत्यन्ताभावः। यथा भूतले घटो नास्तीति। तादात्म्यसम्बन्धावच्छिन्न-प्रतियोगिताकोऽन्योऽन्याभावः। यथा घटः पटो नेति।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

११०. सर्वास्तिवादः कस्य दार्शनिकसम्प्रदायस्य मतमस्ति ?

(A) सौत्रान्तिकसम्प्रदायस्य

(B) माध्यमिकसम्प्रदायस्य

(C) वैभाषिकसम्प्रदायस्य

(D) योगाचारसम्प्रदायस्य

बौद्धदर्शनम् - सर्वदर्शनसंग्रहः

ते च बौद्धाश्चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति। ते च माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकसंज्ञाभिः प्रसिद्धाः यथाक्रमं सर्व्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षवादानातिष्ठन्ते। यद्यपि भगवान्बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चतुर्विधम्।

बौद्धदर्शन के दो भेद हैं – १. हीनयान २. महायान

हीनयान के दो भेद –

१. वैभाषिक (बाह्यार्थानुमेयत्व) २. सौत्रान्तिक (बाह्यार्थप्रत्यक्षवाद/ सर्वास्तित्ववाद)

महायान के दो भेद- ३. योगाचार (बाह्यशून्यत्ववाद) ४. माध्यमिक (सर्वशून्यत्ववाद)

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१११. एकाङ्गानुवादेन विधियमानयोरङ्गयोरन्तराले विहितत्वं कस्य लक्षणमस्ति ?

(A) संदंशस्य

(B) प्रकरणस्य

(C) स्थानस्य

(D) लिङ्गस्य

अर्थसंग्रहः - विनियोगविधेः श्रुत्यादिषट्प्रमाणान्तर्गत-प्रकरणभेदयोः महाप्रकरणञ्च-अवान्तरप्रकरणयोः अवान्तरप्रकरणम् अङ्गभावसम्बन्धिप्रकरणमवान्तरप्रकरणम्। तेन चाभिक्रमणादीनां प्रयाजाद्यङ्गत्वम्। तच्च सन्दंशेनैव ज्ञायते। संदंशलक्षणम् – एकाङ्गानुवादेन विधीयमानयोरप्यङ्गयोरन्तराले विहितत्वं सन्दंशः। यथाऽभिक्रमणे।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY
Suggested: शिशुपालवधमहाकाव्यम्
।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

११२. अर्थसंग्रहानुसारं वेदं कृत्वा वेदिं करोति इति वाक्यं श्रुतेः किं रूपमस्ति ?

(A) पाठक्रमपरम्

(B) क्रमविशिष्टपदार्थपरम्

(C) अर्थक्रमपरम्

(D) केवलक्रमपरम्

अर्थसंग्रहः - प्रयोगविधिः

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। .....अतः एवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम्। तत्र क्रमो नाम वितातिविशेषः। पौर्वापर्यरूपो वा। तत्र षट्प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि। तत्र क्रमपरवचनं श्रुतिः। तच्च द्विविधम्।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

११३. व्याप्तिविशिष्टपक्षधर्मताज्ञानं किम् ?

(A) अनुमानम्

(B) परामर्शः

(C) अनुमितिः

(D) व्याप्तिः

तर्कसङ्ग्रहः, अनुमानखण्डः

अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः। व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं परामर्शः। तज्जन्यं 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिः।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

११४. प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च किं भवति ?

(A) विशेषः

(B) मनः

(C) बुद्धिः

(D) जीवम्

तर्कसङ्ग्रहः, मनोनिरूपणम्

सुखदुःखाद्युपलब्धिसाधनमिन्द्रियं मनः।
तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

११५. बौद्धदर्शनानुसारं कति स्कन्धाः सन्ति ?

(A) अष्ट

(B) पञ्च

(C) सप्त

(D) द्वादश

बौद्धदर्शनम् - सर्वदर्शनसंग्रहः

एवं चित्तचैत्तात्मकस्कन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः। तत्र रूप्यन्त एभिर्विषया इति व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः, आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः, प्रागुक्तस्कन्धद्वयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः, गौरित्यादिशब्दोल्लेखिसंविज्ञानप्रवाहः संज्ञास्कन्धः, वेदनास्कन्धनिबन्धनारागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्धः।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

११६. अङ्गप्रधानसम्बन्धबोधको विधिः कः ?

(A) प्रयोगविधिः

(B) विनियोगविधिः

(C) अधिकारविधिः

(D) उत्पत्तिविधिः

अर्थसंग्रहः - विनियोगविधिः

अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः। यथा 'दध्ना जुहोती'ति। स हि तृतीयया प्रतिपन्नाङ्गभावस्य दध्नो होमसम्बन्धं विधत्ते। दध्ना होमम्भावयेदिति।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

११७. बौद्धदर्शनानुसारं कति आयतानि सन्ति ?

(A) पञ्च

(B) एकादश

(C) द्वादश

(D) सप्त

बौद्धदर्शनम् - सर्वदर्शनसंग्रहः

द्वादशायतनपूजा श्रेयस्करीति बौद्धनये प्रसिद्धम् -

अर्थानुपार्ज्य बहुशो द्वादशायतानि वै।
परितः पूजनीयानि किमन्यैरिह पूजितैः॥
ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च।
मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः॥

(द्वादश आयतनानि – पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनः, बुद्धिः।)

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

११८. घटोऽभिधेयः प्रमेयत्वात् पटवत् इत्यत्र प्रमेयत्वम् कीदृशः हेतुः ?

(A) केवलान्वयिहेतुः

(B) केवलव्यतिरेकिहेतुः

(C) अन्वयव्यतिरेकिहेतुः

(D) अनैकान्तिकः

तर्कसंग्रहः, त्रिविधं लिङ्गम्, तत्र केवलान्वयि अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा, घटोऽभिधेयः प्रमेयत्वात् पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वादभिधेयत्वाच्च।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

११९. इदमज्ञानं समष्ट्यभिप्रायेण किं व्यवह्रियते ?

(A) असंख्यम्

(B) एकम्

(C) चत्वारः

(D) अनेकम्

वेदान्तसारः, अज्ञानसमष्टिव्यष्टिस्वरूपनिरूपणम्

इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते। तथाहि यथा वृ
समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशो यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति
नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्य
"अजामेकां"(श्वे.उ.४.५) इत्यादिश्रुतेः। इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना। एतदु
चैतन्यं सर्वज्ञत्व-सर्वेश्वरत्व-सर्वनिन्यतृत्वादि-गुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इ
व्यपदिश्यते सकलज्ञानावभासकत्वात्।"यः सर्वज्ञः सर्ववित्" (मु.उ.१.१९) इति श्रुतेः।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२०. निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः किमुच्यते ?

(A) समाधानम्

(B) शमः

(C) उपरतिः

(D) दमः

वेदान्तसारः, साधनानि (अधिकारीविशेषणम्)

साधनानि नित्यानित्यवस्तुविवेके-हामुत्रार्थफलभोगविराग-शमादिषट्कसम्पत्ति-मुमुक्षुत्वानि। .....शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः। शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः। दमः बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम्। निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिरथवा विहितानां कर्मणां विधिना परित्यागः। तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता। निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्। गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा। मुमुक्षुत्वम् मोक्षेच्छा।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२१. परस्य न परस्येति ममेति न ममेति च। तदास्वादे विभावादेः परिच्छेदो न विद्यते ॥

अत्र तदास्वादे इति पदेन कस्य बोधो भवति ?

(A) हासस्य आस्वादे

(B) रतेः आस्वादे

(C) विभावादीनाम् आस्वादे

(D) रसानाम् आस्वादे

परस्य न परस्येति ममेति न ममेति च।
तदास्वादे विभावादेः परिच्छेदो न विद्यते॥
साहित्यदर्पणः ३.१२
(तदास्वादे – रसानाम् आस्वादे)

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२२. कृतिज्ञप्तिभेदेभ्यः विलक्षणः स्वादनाख्यः व्यापारः किं कथ्यते ?

(A) लक्षणाव्यापारः

(B) तात्पर्याव्यापारः

(C) रसः

(D) व्यञ्जनाव्यापारः

अत एवाहुः – 'विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः' इति। अति एव हि रसनास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा इति। अभिधादिविलक्षणव्यापारमात्रप्रसाधनग्रहिलैरस्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवति।

साहित्यदर्पणवृत्तिः ३.४/१

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२३. कस्मात् कारणवत् भक्त्या ध्वनिर्न लक्ष्यते ?

(A) अतिव्याप्तेरव्याप्तेश्च

(B) अव्याप्तेः

(C) असम्भवात्

(D) अतिव्याप्तेः

ध्वन्यालोकः, प्रथम उद्योतः

यदप्युक्तं भक्तिर्ध्वनिरिति, तत्प्रतिसमाधीयते –

भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।
अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया॥१.१४॥

नैव भक्त्या ध्वनिर्लक्ष्यते। कथम् ? अतिव्याप्तेरव्याप्तेश्च।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY
Suggested: किरातार्जुनीयम्
।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२४. केषां वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित् अन्यथात्वमपि इष्यते?

(A) रचनानाम्

(B) वर्णानाम्

(C) रचनावृत्तिवर्णानाम्

(D) वृत्तीनाम्

काव्यप्रकाशः, अष्टम उल्लासः
यद्यपि गुणपरतन्त्राः सङ्घटनादयः, तथापि
वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित्।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते॥७७॥

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२५. सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः कः ?

(A) भावोदयः

(B) ब्रह्म

(C) भावः

(D) रसः

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
साहित्यदर्पणः ३.२
.....चिन्मयः स्वरूपार्थे मयट्।

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२६. अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥ अत्र अविकत्थन शब्दस्य कः अर्थः?

(A) अङ्गीकृतनिर्वाहकः

(B) निगूढमानः

(C) अनात्मश्लाघाकरः

(D) अनभिभूतस्वभावः

तत्र धीरोदात्तः
अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥
- साहित्यदर्पणः ३.३२

अविकत्थनोऽनात्मश्लाघाकरः। महासत्त्वो हर्षशोकाद्यनभिभूतस्वभावः। निगूढमानो विनयच्छन्नगर्वः। दृढव्रतोऽङ्गीकृतनिर्वाहकः। यथा – रामयुधिष्ठिरादिः। (सा.द.वृत्तिः)

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२७. अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति।
सामर्थ्यकृतमित्राणां मित्राणां च नृपात्मजः॥ अस्मिन् श्लोके कीदृशः श्लेषोऽलङ्कारः?

(A) विभक्तिश्लेषः

(B) प्रत्ययश्लेषः

(C) भाषाश्लेषः

(D) प्रकृतिश्लेषः

श्लेषालङ्कारः, प्रकृतिश्लेषः
अत्र नपुंसकस्त्रीलिङ्गयोः श्लेषो वचनश्लेषोऽपि।
अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः॥
अत्र 'वक्ष्यति' इति वहि-वच्योः, 'सामर्थ्यकृत्' इति कृन्तति-करोत्योः प्रकृत्योः। (सा.द.वृत्ति १०.११/१)

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२८. प्ररोचना कस्या वृत्तेः अङ्गमस्ति ?

(A) सात्त्वतीवृत्तेः

(B) आरभटीवृत्तेः

(C) कैशिकीवृत्तेः

(D) भारतीवृत्तेः

भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः॥६.२९॥
संस्कृतबहुलो वाक्प्रधानो व्यापारो भारती।
तस्याः प्ररोचना वीथी तथा प्रहसनामुखे।
अङ्गान्यत्रोन्मुखीकारः प्रशंसातः प्ररोचना॥६.३०॥
साहित्यदर्पणः

तस्याः भारतीवृत्तेः चत्वारः रूपाः
१. प्ररोचना २. वीथी ३. प्रहसनम् ४. आमुखम्

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१२९. नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता अत्र 'नियतानां' इत्यस्य पदस्य कोऽर्थः ?

(A) प्राकरणिकानाम्

(B) प्राकरणिकाप्राकरणिकानामेव वा

(C) तटस्थानम्

(D) अप्राकरणिकानाम्

नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता॥१०.१०४

नियतानां प्राकरणिकानामेव, अप्राकरणिकानामेव वा।

काव्यप्रकाशवृत्तिः – १०.१०४

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

DSSSB PGT SANSKRIT MALE EXAM 2021SOLVED PAPER PART - III EXAM DATE 16/7/21POSTCO...

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१३०. 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्' अत्र 'समेन' पदस्य कोऽर्थः ?

(A) औपम्यवाचकशब्देन

(B) साम्येन

(C) उपमेयेन

(D) उपमानेन

उत्प्रेक्षालक्षणम्

- काव्यप्रकाशः १०.९२

सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

समेन = उपमानेन। (काव्यप्रकाशवृत्तिः)

7:49 / 13:17 Scroll for details SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

DSSSB PGT SANSKRIT MALE EXAM 2021SOLVED PAPER PART - III EXAM DATE 16/7/21POSTCO...

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१३१. आदायवारि परितः सरितां मुखेभ्यः किन्तावदर्जितमनेन दुरर्णवेन।
क्षारीकृतं च वडवादहने हुतं च पातालकुक्षिकुहरे विनिवेशितं च ॥ अत्र कोऽलङ्कारः?

(A) अर्थान्तरन्यासः

(B) निदर्शना

(C) समासोक्तिः

(D) अप्रस्तुतप्रशंसा

अप्रस्तुतालङ्कारस्य उदाहरणम्
काव्यप्रकाशवृत्तिः १०.९९
अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया॥१०.९८॥
कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा॥१०.९९॥

8:02 / 13:17 Scroll for details SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१३२. व्यभिचारिभावानां शब्दवाच्यता कीदृशः दोषः ?

(A) वाक्यदोषः

(B) रसदोषः

(C) अर्थदोषः

(D) पददोषः

१३ त्रयोदश रसदोषाः

व्यभिचारिरसस्थायिभावानां शब्दवाच्यता।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः॥
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।
अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः॥
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः।
अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः॥

काव्यप्रकाशः ७.६०-६२

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१३३. लक्षणाप्रसङ्गे गौरनुबन्ध्यः कस्याचार्यस्योदाहरणमस्ति ?

(A) मुकुलभट्टस्य

(B) मम्मटस्य

(C) पार्थसारथिमिश्रस्य

(D) विश्वनाथस्य

'गौरन्बन्ध्यः' इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते, "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे" इति न्यायादित्युपादानलक्षणा तु नोदाहर्तव्या।

काव्यप्रकाशवृत्तिः – २.१०

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१३४. नियताप्तिः अत्र नियतशब्दस्य कोऽर्थः ?

(A) अनिश्चिता प्राप्तिः

(B) कठिना प्राप्तिः

(C) निश्चिता प्राप्तिः

(D) संदिग्धा प्राप्तिः

साहित्यदर्पणः, कार्यस्य पञ्च अवस्थाः

.....नियताप्तिस्तु निश्चिता।

साहित्यदर्पणः ६.७३/१

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

।। स्वयमेव मृगेन्द्रता ।।

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१३५. यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा।
अनुकम्प्योऽनुकम्प्यश्च सजातः स च जीवति॥ काव्यप्रकाशेऽस्मिन् श्लोके कीदृशो ध्वनिः प्रोक्तः?

(A) पदद्योत्यः ध्वनिः

(B) रसध्वनिः

(C) उपसर्गद्योत्यः ध्वनिः

(D) पदांशद्योत्यः ध्वनिः

काव्यप्रकाशः ४.४२
... पदेऽप्यन्ये ...
..... अत्र द्वितीय 'मित्रादि'शब्दा आश्वस्तत्व-नियन्त्रणीयत्व-स्नेहपात्रत्वादिसंक्रमितवाच्याः।
काव्यप्रकाशवृत्तिः ४.४२

SUBSCRIBE YOUTUBE CHANNEL

ONLINE SANSKRIT UNIVERSITY

॥ स्वयमेव मृगेन्द्रता ॥

DSSSB PGT SANSKRIT MALE 2021 PART - III

वस्तुनिष्ठप्रश्नाः

१३६. अवान्तरार्थविच्छेदे अच्छेदकारणं किं कथ्यते ?

(A) बीजम्

(B) प्रकरी

(C) बिन्दुः

(D) प्ररोचना

साहित्यदर्पणः, पञ्च अर्थप्रकृतयः
अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।
साहित्यदर्पणः ६.६६
(बिन्दुः – अर्थप्रकृतिः)

SUBSCRIBE YOUTUBE CHANNEL

Suggested: संस्कृत साहित्य परिचय

वस्तुनिष्ठप्रश्नाः

१३७. पूर्वरङ्गं विधाय सूत्रधारे विनिर्गते कः वस्तुं, बीजं, मुखं पात्रं वा सूचयति ?

(A) स्थापकः

(B) नान्दीनायकः

(C) पूर्वरङ्गविधायकः

(D) नायकः

साहित्यदर्पणः, स्थापकः
पूर्वरङ्गं विधायैव सूत्रधारा निवर्तते।
प्रविश्य स्थापकस्तद्वत्काव्यमास्थापयेत्ततः॥
साहित्यदर्पणः ६.२६